नाम

पत्र सं०

श्लोक सं०

ग्रन्थ सं० (नयी)

ग्रन्थ सं० (पुरानी)

आकार

लिपि

आधार

वि० विवरण

001899

पी० एस० यू० पी०—[illegible]

२०
१९-१२५

॥ गच्छस्तुनाभांगः ॥

ग.ह्य श्रीगणेशायनमः ॥ ॐ उक्तानिवैतानिकानिगृह्याणिवक्ष्यामस्त्रयःपाकयज्ञा
१ हुताअग्नौहूयमानाअनग्नौप्रहुताब्राह्मणभोजनेब्रह्मणिहुताअथाप्युदाहरंति
श्रा यःसमिधायआहुतीयोवेदेनतिसामिधमेनापिश्रद्धानंआदध्यात्तेनयजइदाणिते
नमस्तस्मैयआहुत्यायोवेदेनेतिविद्येयंतापश्चित्रिभीतिस्तदेतत्सर्वंनृषिरेवाचेअग्ना
र्धायगाविष्टपुरुस्पृहदस्मैवचःघृतात्स्वादीयोमधुनश्चवोचेदितिवचएवमहद्यो राम
ताव्रमधुनश्चस्वादीयोतिभिषाति स्वादीयांस्त्विषेवतदादौ आतेअग्नऋचाहविर्हृ
दातष्टंभरामसितेतेभवंतृक्षणाऋषभासोवशाउतेस्येतएवमउक्षणाश्चमेधभी

श्ववशाश्वमवातियएवंस्वाध्यायमधीयतइतियोनमसास्वध्वरइतिनमस्कारेणैवखल्वपि
नवैदेवानमस्कारमतियज्ञोवैनमइतिहिब्राह्मणंभवति ॥१॥ अथसायंप्रातःसिद्धस्य
हविष्यस्यजुहुयात्अग्निहोत्रदेवताभ्यःसोमायवनस्पतयेअग्नीषोमाभ्यामिन्द्राग्निभ्यां
द्यावापृथिवीभ्यांधन्वंतरयइन्द्रायविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेत्यथबलिहरणम्
ताभ्यएवदेवताभ्योऽद्भ्यओषधिवनस्पतिभ्योगृहायगृहदेवताभ्योवास्तुदेवताभ्यइंद्रा
येंद्रपुरुषेभ्योय मायय मपुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमायसोमपुरु
षेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येविश्वेभ्योदेवेभ्यःसर्वेभ्योग्ने

Indira Gandhi National
Centre for the Arts

ग॰ सू॰ २ भ्यो दिवाचारिभ्य इति दिवा नक्तं चारिभ्य इति नक्तं रक्षोभ्य इत्युत्तरतः स्वधा पितृभ्य इति प्राची
नावीती शेषं दक्षिणा निनयेत् ॥२॥ अथ गृहबलिदेवतानां कीर्त्तिर्दिक्ष्वामो यत्र यत्र वद स्म
तिते धारापितामहे विधात्मको लिचउमापति आग्नेय्यां बलभद्रं च यमं विष्णुं च दक्षि
णे नैर्ऋत्यां स्कंदवरुणौ च सोमं सूर्यं च पश्चिमे वायव्यामश्विनौ वसवः सोमो रू॰ द
त्तरस्यां दिशि ईशान्यां नक्षत्राणि उग्र द्वाः पूर्वस्यां दिशि गृहमध्ये ब्रह्माणं प्रतिष्ठाप्य स ब
दिगु दिक्षिपाक्षीमिरिति ॥ ततः स्मार्त्तबलित्रयं गृह्यां गणो देयं विदितो येमनाः प्रचर ताम
ति दिवा नक्तं बलिमिच्छन्तो वितुरस्य प्रेष्याः तेभ्यो बलिं पुष्टिकामो हरामि मामायदुष्टि २

२ यत्नौ स्मिपनद [illegible] नेमोक्ता [illegible]
पंचालि [illegible] कोमि [illegible]
तेरवृत्ति [illegible] नुमपादजनरूतल ॥३

एष्टे पतिर्दे दानु स्वाहा ॥ ऐन्द्रवारुणवायव्यायाम्या [illegible] नैर्ऋतिका श्वपच काकाः प्रतिनिष्ठ गृ॰ बलि
तु भूम्यां पिंडं मयार्पितं ॥ वैवस्वतकुले जातौ द्वौ श्याम[illegible]शबलौ शुनौ ॥ ताभ्यां पिंडो मया
दत्तो रक्षतां पथि मां सदा ॥ चांडालपतितभूतवायसेभ्यो भूमौ निक्षिपेत् ॥ गोदो
कौल्ल हनमात्रं तत्रास्थित्वातिथिमाकांक्षेत् ॥ दर्शपादोपस्पर्शाः साचम्य गृहप्रवेशः यदन्नं प्रात
ः पृथिवी शिवमन्तरिक्षं द्यौर्नो दभयं नोऽस्तु ॥ दिशो दिशः प्रदिश उद्दिशो न आ
वेम्नतः पो विद्युतः परिपान्तु सर्वतः शांतिः शांतिः शांतिः ॥३॥ अथ खलु यत्रैकचद्राष्ट्यस्या
दित्समानाव रसर्वतः स्थंडिलमुपलिप्याः लेखा पद्‍लेखा उदगायतां पश्चात

गृ.सू.
३

गायत्रेणानंतर्योलिखित्वामध्येतदभ्युक्ष्याग्निंप्रतिष्ठाप्यान्वाधायपरिसमुह्यपरिस्ती
र्यपुरस्ताद्दक्षिणतःपश्चादुत्तरतउदकंस्थंतष्ठीपर्युक्ष्यपवित्राभ्यामाज्यस्यो
त्पवनंमप्राद्धेनागावनंतगेभाषादेशमात्रौकुशौनानांतयोगर्भंदात्वांगुष्ठोपकनि
ष्ठिकाभ्यामुत्तानाभ्यांपा णिभ्यांसवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणव
सोःसूर्यस्यरश्मिभिरितिप्रागुत्पुनातिसकृन्मंत्रेणद्विस्तूष्णींकृतानिकृतमाज्यंदाम
पुपरिस्तरणतथाज्यभागौपाकयज्ञेषुस्याच्चधन्वंतरियज्ञशूलगववर्जममुष्मै राम
स्वाहेतिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वेदेवाब्रह्मेत्यनादेशेएकबर्हिरिध्मा

स्विष्टकृतस्त्रुक्स्रुवकालान्तदेशानयज्ञगाथागीयते॥पाकयज्ञान्समासाद्यैकाज्यानेक
बर्हिषः॥एकःस्विष्टकृतःकुर्यान्नानापिसतिदैवतइति॥जातकर्मनामधेयप्राशनपक्वंक
र्माणेन्नचूडाकर्मोपनयनगोदानविवाहाःसर्वकालमेकेविवाहंतेषांपुरस्ता
च्चतस्रआज्याहुतीर्जुहुयादग्नआयूंषिपवसइतितिसृभिःप्रजापतेनत्वदेतान्य
न्यइतिचव्याहृतिभिर्वासमस्तंव्यस्तमेकेनैकेकाचनंत्वमयेमाभवासिपत्नीनामिति
विवाहेचतुर्थी॥कुलमग्रेपरीक्षेतयेमातृतःपितृतश्चेतियथोक्तंपुरस्ताद्बुद्धि
मतेकन्यांप्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेतदुर्विज्ञेयानिल

८घ ४ न्तरतोऽन्यष्टेपिंडान्कृत्वोत्तरतमग्रेष्वंथमंजुतरक्ते सूत्यं प्रेति हितां यादि यं कुमार्यभिजा
तांति दियामिदप्रतिपद्यते य स समंत दुग्धतामिति पिंडान भिमंत्र्य कुमारी यादिषा
मकुरूद्राणीति स्त्रिया वेदुभयतः सस्याद्रूहस्ती यादं नवत्यस्याः प्रजाभाविष्यतीति वि
द्यांज्ञाश्चा सश्रुमतीविदिपुरीषाद्वस्वर्चास्विन्यविदा सिनोद्रूदोत्सर्वं संपन्ना
देवनाक्षिनवीचनप्पयादिप्रवाज्जनीरिणादधन्याश्मशानान्नतिध्नी धुःखल
कृसकन्यामुदकपूर्वादद्यादेषब्राह्मोविवाहेस्त स्यांजातोदशपूर्वान्दशप राम ५
रानुनात्युभयतत्र विजावितनेकर्मोणादद्यादेलंकृत्य सदैवादशावरान्दशा

परान्पुनात्युभयतः सहधर्मं चरतामिति प्राजापत्योदशावरान्दशपरान्पुनात्युभयतो
गोमिथुनं दत्वोपयच्छेत स आर्षः सप्तावरान्सप्तपरान्पुनात्युभयतोमिथुनः समध्
कृत्वोपयच्छेत स गांधर्वो धनेनोपतोष्योपयच्छेत स आसुरः सुप्तानां प्रमत्तानां वा
पहरेत्स पैशाचो हत्वा भित्वाच शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः ॥ ७ ॥ अथ
खल्वावचाजनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयात् यत्तु समानं तद्वक्ष्या
मः पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुंभं समन्वारब्धायां हु
त्वा तिष्ठन्प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृभ्णामि ते सौभगत्वाय हस्त

ग्र·घ· ५

मिंहस्तंगुष्ठमेवगृह्णीयाद्यदिकामयीतपुमांस एवमेपुत्राजायेरंनेत्यंगुलीरेवस्त्री
कामौ तिमांतेदलसांगुष्ठमुभयकाम: प्रदक्षिणमग्निमुदकुंभंचात्रे: परिणाय
जपत्यमोहमस्मिसात्वंसात्वमस्यमोहं द्यौरहं पृथिवीत्वंसामाहमृक्त्वंताविह
हाविवहावहै प्रजांप्रजनयावहै संप्रियौरोचिष्णू सुमनस्यमानौजीवेम शा
रद: शतमितिपरिणायपरिणाय्याश्मानमारोहयतीम मश्मानमारोहाश्मे
वत्वंस्थिराभव। द्दृस्व पृतनायतोभितिष्ठ पृतन्यत इति वध्वंजलावुपस्ती राम ५
र्यै भ्राताभ्रातृस्थानोवा द्विर्लाजानावपति त्रिर्जमदग्न्यानां प्रत्यभिघार्य

हविरवत्तंचशेषोवदानधर्मोर्यमणंनुदेवंकन्याग्निमयक्षत। स इमांदेवो अर्य
माप्रेतोमुंचातुनामुत: स्वाहा। वरुणंनुदेवंकन्याग्निमयक्षत स इमांदेवोवरुण
प्रेतोमुंचातुनामुत: स्वाहा पूषणंनुदेवंकन्याग्निमयक्षत। स इमांदेव: पूषाप्रेतो
मुंचातुनामुत: स्वाहेत्यविच्छिंदत्यंजलिं स्रुचेवजुहुयात्परिणायश्मरूपपुटेना
श्मासन्नक्षावत्पश्चेमाप्नोष्यदेकैलाजान्परिणयनंसर्पत्योत्तमे श्राहुतीनसानित्य
धार नतोमेक्षादाक्षविमुंचतिपादेक्षतेनवनतंकूर्णांस्रुचे पापस्य यो वेद भवत: प्रला
मुंचामिवरुणस्यपाशादिति जरामजरयाप्ये नामपराजितायांदिशिसप्तपदा

२०.८ न्यस्तु त्रीमयें भूएकपदी ऊर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्प
६ दी प्रजाभ्यः पंचपदी ऋतुभ्यः षट्पदी सखा सप्तपदी भव सामामनुव्रता भव पु
त्रान्विंदावहै बहूंस्ते संतु जरदष्टयः ... धायाः शिरसि उदकुंभेना
दसिच्यैवाह्मणपाश्चहदार्याजीवपत्नी जीवप्रजा वा अगारे एतां रात्रीं वसेत् ध्रु
मरुंधतीं सप्तऋषीनिति दृष्ट्वा वाचं विसृजेत् जीवपत्नी प्रजां विंदेयेति ध
प्रयाणे उपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेदश्मन्व
तीरीयते संरभध्वमिति सेर्द्धीननावमारोहयेदुत्तरेत्युत्क्रम येजीवं रुदंती

निरुदत्याविवाहाग्निमग्रतोऽजस्रं नयंति कल्याणेषु देशवृक्षचतुष्पथेषु मा वि
दन्परिपन्थिन इति जपे वासे वासे सुमङ्गलीरियं वधूरिति ईक्षिकानीक्षेत इहगि
यं प्रजया ते समृध्यतामिति गृहं प्रवेशयेत् विवाहाग्निमुपसमाधाय पश्चादस्या
नडुहं चर्म आस्तीर्य प्राग्ग्रीवमुत्तरलोमं तस्मिन्नुपविशत्याह ... समञ्जन्तु विश्वे देवा इति
दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानायोः हृदये ततऊर्ध्वमक्षारालवणाशि
नौ ब्रह्मचारिणौ वधः शायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्भवतीति
व्रतः सूर्याविदं वधूवस्त्रं दद्यात् अन्नं ब्राह्मणेभ्यः स्वस्त्ययनं वाचयीत गौ दक्षिणा

××समन्वारब्धायां मानः प्रजां जनयतु प्रजापतिरितिच...
× प्रसूच्चैकुसी४×

गृ.सू. ७ इत्यादि गृह्यमास्थरेत्स्वयम्पत्न्याः पिता पुत्रः कुमार्य्यन्तेवासी वा नित्यासनगृही
तस्यो दिन पञ्चाम्भोः सप्तम्यु पवसे दिहे केन स्थाग्निहोत्रं गाग्नादुष्कर णहोम का
लौ माख्यातौ होम्य चमोसद्यजेकामिर्ज्ञी द्विष्वतिलैग्नयस्वाहेति सायं जु
हुयोद्यापस्वाहेति प्रातर्लक्ष्मी इतीयत्र नेयत्र ॥ अथ पार्वणस्थालीपा
केल स्यदर्श इ पौर्णमास्यामुपवासे ध्मादि द्विपाक्ष सन्नदन्नं देवताभ्यां पार्वं
णा इ मरुद्भ्यःदर्जेकामास्तरन स्पन्न देवतापरकर न रोम पुष्टो निर्वपाति तम ७
वित्रेश्रृतप्रोप्य पोम्य लाजघा निर्वपा लिखेनाज्ञोक्ष्य तेयथा नरुह मुषो

वाजुहु प्रोक्षा मौत्स वदतां त्रिः फलीकृतांनानाश्म नदेत्समोपवादादेनाना श्रप
यै हिम ज्यतउत्पान मिमृष्टौदि द्मुमुषाद्द ममुषा
इति यथुवत समा प्यद्युद्वार उत्स यात्हुतानिद्वांप्यभिघार्य्य दग्नुहास्थं बर्हिषा
स्य ४ सादयेपभिघार्यैध्ममभिघार्य्यैतंते इध्म आत्मा जातवेदस्तेन व्यस्व वर्धस्व चेद्ध
वर्द्धय चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति समिधामाघा
अ २ रावाघार्यौ भागौ जुहुयादग्नये स्वाहेत्युत्तरमाग्नेय दक्षिणं सौ विज्ञायते चक्षुषी मेर
षी वा एते यज्ञस्य यदाज्यभागौ तस्मात्पुरुषस्य प्रत्यङ्मुखस्यासीनस्य दक्षिणा
स्वाहा सोमाय २

Indira Gandhi National Centre for the Arts

गृ.सू. मध्युत्तरं भवेन्तुत्तरं दक्षिणां मध्ये द्रवीं षिष्टस्कृत्करं वा प्राक्संस्थान्युदक्संस्थानि वौत्तर
८ पुरस्तात्सौविष्टकृतं मध्यात्पूर्वार्द्धाच्चावद्यति विषेवद्यति मध्यात्पूर्वार्द्धात्पश्चार्द्धादिति पं
चावत्तिनामुत्तरार्धात्सौविष्टकृतं नावद्यति वीप्रत्याभिघारयति स्विष्टकृतं द्विरभि
४सू घारयति यदस्य कर्मणोत्यरीरिचं यद्वान्यूनमिहाकरम् अग्निष्टात्स्विष्टकृद्विद्यात्सर्वं
५३ स्विष्टं सुहुतं करोतु मे अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामा
नां समर्द्धयित्रे सर्वान्नः कामान्समर्द्धय स्वाहेति बार्हिषि पूर्णपात्रं निनयेदेषाव
ऋथः पाकयज्ञानामितन्त्रं हविरुच्छिष्टं दक्षिणा ॥१॥ अथ पशुकल्पः उत्तर राम ८

तोऽग्नेः शामित्रस्यायतनं कृत्वा दापयित्वा पशुमाप्लाव्य पुरस्तादग्नेः सज्ञपनमवस्था
प्यान्निर्हृतमिति वा स्मात्कृत्वा सपलाशयार्द्रशाखया पश्चादुपस्पृशेदमुष्मै त्वा
पु जुष्टमुपाकरोमीति व्रीहियवमतीभिरद्भिः पुरस्तात्प्रोक्षत्यमुष्मै त्वा जुष्टं प्रोक्षामी
ति तासां पाययित्वा दक्षिणमनु बाहुं शेषं निनयेदाहृत्येव पर्यग्निकृत्वोदञ्चं नयं
ति तस्य पुरस्तादुल्मुकं हरन्ति शामित्र एष भवति वपाश्रपणीभ्यां कर्ता पशु उ
मन्वारभते कर्तारं यजमानः पश्चाच्छामित्रस्य प्राक्शिरसं प्रत्यक्शिरसं वोद
क्पादं संज्ञप्य पुरा नाभेस्तृणमन्तर्धायैव वपामुत्खिद्य वपामवदाय वपाश्रपणी

Indira Gandhi National
Centre for the Arts

गृ. व्य. स्यापरिग्रह्याङ्गिरभिषिच्य श्रामित्रेणतापयाग्रेणोनमग्निंहृत्वादक्षिणतनआसीनः
श्रपयित्वापरास्यजुहुयादेतस्मिन्नेवाग्नौस्थालीपाकं श्रपयेत्सैकादशपशोरवदा
नानिसर्वाणिमासावदायश्रामित्रेश्रपयित्वाहृदयंशूलेप्रताप्यस्थालीपाकस्याग्र
तोजुहुयादवदानैर्वासिद्धेकेकस्यावदानस्याद्वाद्वौरिवद्यौतावृतेवहृदयशूलेनच
रंति ॥१४॥ चैत्यपतेप्राङ्मासिष्टकर्तेश्चेत्यायबलिंहरेद्यद्युवैविदेशस्थंपलाशदू
तेनपत्रैर्वस्थवनस्पतस्तेनयच्चौदोपिंडांकृत्वावीवधेन्याधायदूतायप्रयच्छे
दिमंतस्मैदबलिंहरेतिचैनंब्रूयादयंनेमामितियोदूतायप्रतिभयंचैदंतराधा

स्त्रमापिकिंचिन्नाध्याचेनद्यंतराद्वावरूपमापाकंचिदंनेनतरितव्यमितिधन्वंतरा
य च ब्रह्मणमग्निंवांतरापुरोदितायायबलिंहरेत् ॥१५॥ उपनिषदि
गर्भलंभनंपुंसवनमनवलोभनंचयादेनाधीयोत्ततीयेगर्भमासेतिष्येणपोषि
तायाःसरूपवत्सायागोर्दध्निद्वौद्वौमाषौयवंचदधिप्रसृतेनप्राशयेत्किंपिब
सिकिंपिबसीतिपृष्ट्वापुंसवनंपुंसवनमितित्रिःप्रतिजानीयादेवंत्रीन्प्रसृतान्
गा २ तथास्यैमंडलागारच्छायायांदक्षिणस्यांनासिकायामजीतामोषधींनस्तःकरोति
प्रजावज्जीवपुत्राभ्यांहैके ॥ अथगर्भोयोनिमेतुडमान्वातारवेधुधी ॥ आवा ए

गृ.स्य. स्यां परिगृह्याङ्गिरभिषिच्य प्राग्मित्रेण तां पर्ग्रेणाग्निं हृत्वा दक्षिणत आसीनः
श्रपयित्वा पर्युक्ष्य जुहुयादेतस्मिन्नेवाग्नौ स्थालीपाकं श्रपयेत्सैकादशपशोरवदा
नानि सर्वाङ्गेभ्योऽवदाय प्राग्मित्रे श्रपयित्वा हृदयशूले प्रताप्य स्थालीपाकस्याग्र
तो जुहुयादवदानं वा सदेकैकस्यावदानस्य द्विर्द्विरवद्यति हुत्वा हृदयशूलेन च
रति ॥१४॥ चैत्याय पते प्राङ्मुखः स्विष्टकृते ऽवदानं बलिं हरेद्यद्युवै विदेशस्थं पलाशद्
तेन पत्रवेष्टवनस्पतये नयत्रयो द्वौ पिण्डौ कृत्वा वीवधेभ्याधायेदूताय प्रयच्छे
दिमं तस्मै बलिं हरेति चेनं ब्रूयाद्यं त्वभ्यामिति यो दूताय प्रतिभयं चेदं तराश

स्त्रमापि किंचिन्नाश्याचेनं नश्यंतरा स्वरूपमापि किंचिदनेनंतरितव्यमिति धन्वंतर
य ज्ञे ब्रह्माणमग्निं चान्तरा पुरोहिताया गृह्य बलिं हरेत् ॥१५॥ उपनिषदि
गर्भलम्भनं पुंसवनमनवलोभनं च पादनाधीयात्तृतीये गर्भमासे तिष्येण पोष
तायाः सरूपवत्साया गोर्दधनि द्वौ द्वौ माषौ यवं च दधिप्रसृतेन प्राशयेत् किं पिब
सि किं पिबसीति पृष्टा पुंसवनं पुंसवनमिति त्रिः प्राश्नीयादेवं त्रीन्प्रसृतान्
गा२ न्यग्रोधस्य मंजलौ रच्छायायां दक्षिणस्यां नासिकायामजीतामोषधीं नस्तःकरोति
प्रजावज्जीवपुत्राभ्यां हैके ॥ आ ते गर्भो योनिमेतु पुमान्बाण इव तूणीम् ॥ आवी रे

ग्र.ध.
१.

जायंतां पुत्रस्ते दशमास्य इति। आग्नेयं तु प्रथमो देवतानां सोऽस्यै प्रजां मुंचतु मृत्यु-
पाशात्। तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदादिति प्रजा अस्यै
स्थालीपाकस्य हुत्वा हृदयदेशमस्या आलभेत यत्ते सुसीमे हृदये हितमंतः
प्रजापतौ मन्येऽहं मां तद्विद्वांसं माहं पौत्रमघं नियामिति। ॥ चतुर्थे गर्भमा-
से सीमंतोन्नयनं मा प्रथमे गर्भे यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादथाग्नि-
मुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोमं तास्मिन्नुपवि-
ष्टायां समन्वारब्धायां धाता ददातु दाशुष इति द्वाभ्यां राकामहमिति द्वा-
सीमंतोन्नयने
ग्र
१.

भ्यां नेजमेष प्रजापते न त्वदेतान्यन्य इति चतुर्थ्यास्तु द्रुम्मेन शलाटुग्लप्सेन त्रेण्या
च शलल्या त्रिभिश्च कुशपिंजूलैरूर्ध्वं सीमंतं व्यूहति भूर्भुवः स्वरोमिति त्रिश्चतु-
र्वा वीणागाथिनौ संशास्ति सोमं राजानं संगायेतामिति सोमो नो राजावतु मा-
नुषीः प्रजा निविष्टचक्रासाविति यां नदीमुपावसिथा भवति ब्राह्मणपत्न्यो वृद्धा
जीवपत्न्यो जीवप्रजा यद्ब्रूयुस्तत्कुर्युः ऋषभो दक्षिणा॥१५॥ कुमारं
जातं पुरान्यैरालंभात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत्प्र ते
ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनामायुष्मान्गुप्तो देव-
त्रिः
सि

गृ·सू· नाभिः शतं जीव शरदो लोके अस्मिन्निति । तैकर्णयोर्जपति निधाय मेधाजननं जपति मे
११ धां ते देवः सविता मेधां देवी सरस्वती । मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति १२
असावभिमर्शत्यश्मा भव परशुर्भव हिरण्यमस्तृतं भव । वेदो वै पुत्रनामासि स जी
व शरदः शतमिति नौ द्रक्षेर्षो निद्राविणा निधेह्यस्मे प्रयंधि मघवन्नृजीषिन्नि
ति चैनाम चास्मे दधुं घोषवदाद्यंतरंतस्थमभिनिष्ठानांतं घ्यक्षरं चतुरक्षरं
वा घ्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामो युग्मानि त्वेव पुंसामयु गृ
जा । निस्त्रीणामभिवा दनीयं च समीक्षेत तन्मातापितरौ विद्यातां मोप· ११

ग्मा२

कामंस्तैत्तिरंब्रह्मवर्चसत्र

नयनात्प्रवासादेत्य पुत्रस्य शिरः परिगृह्य जपत्यंगादंगात्संभवसि हृदयादधि जाय
से । आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मूर्द्धनि त्रिव घ्रायीत् तैवकुमा
र्यै ॥१६॥ षष्ठे मास्यन्नप्राशनं मांजमन्नाद्यकामो घृतौदनं तेजस्कामो दधि मधु
घृतमिश्रमन्नं प्राशयेत्सर्वकामो भवतीति विज्ञाय ते ऽ अन्नपतेऽन्नस्य नो धेहि दै
नमीवस्य शुष्मिणः । प्रप्रदातारं तारिषः ऊर्जं नो धेहि द्विपदे चतुष्पद इत्यसा
वृत्तैव कुमार्यै ॥१७॥ तृतीये वर्षे चौलं यथाकुलधर्मं वोत्तरतो अग्नेर्व्रीहियवमा
षतिलानां पृथक्पूर्णशरावाणि निदधाति पश्चात्कारयिष्यमाणो मातुरुपस्थे

Indira Gandhi National Centre for the Arts

ग०सू आनडुहंगोमयंनवेत्रारावैशमीपर्णानिचोपनिहितानिभवंतिमातुःपितादक्षि
१२ णातएकविंशतिकुशपिंजूलान्यादायब्रह्मावैतानिधारयेसप्थ्यांकारयिष्यमा
णस्यावस्थायेशीतोष्णाअपःसमानीयोष्णेनवायउदकेनेहीतिलासंगृह्णी
तं४ यान्नवनीदधिद्रप्सान्वापदक्षिणंशिरंदत्यदितिः केशान्वपंत्वापउं
दंतुवर्चसइतिदक्षिणेकेशपक्षेत्रीणित्रीणिकुशपिंजूलान्यभ्यात्मोग्राणि
निदधात्योषधेत्रायस्वेनंस्वधितेवैनंहिंसीरिति निष्पीड्यलोहेनक्षुरे
णप्रछिनत्तियेनावपत्सवितास्सुरेणसोमस्यराज्ञोवरुणस्यविद्वान्शते राम १२

नेब्रह्माणोवपतेदमस्यायुष्मान्जरदष्टिर्यथासदितिछिंधत्वाछिंधत्वाशगग्नेशमी
मीपर्णैःसहमात्रेप्रयछतिताननुडुहेगोमयेनिदधातियेनधाताबृहस्पतेरग्ने
रिंद्रस्यचायुषेवपत्॥ तेनतआयुषेवपामिसुश्लोक्यायस्वस्तयइतितृ
यैर्च तीयेनत्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं यद्देवेषुत्र्यायुषंतन्नोअस्तुत्र्यायुषम्॥तेनतआयुषेवपामिसुश्लोक्या
यस्वस्तयइतितृतीयंसर्वैर्मंत्रैश्चतुर्थमेवमुत्तरतस्त्रिःक्षुरतेजोनिम्
जेयत्क्षुरेणमर्चयतासुपेशसावप्तावपसिकेशान्।शुंधिशिरोमास्यायुःप्रमो
षीरितिनापितंशिष्यातोष्णेनाद्भिरद्भिरव्यर्थंकुर्वीतोक्षणवन्कुश लीकुर्य

Indira Gandhi National
Centre for the Arts

ग०ध तेयथाकुलधर्मंकेशान्वेशान्कारयेद्दक्षिणतेवकुमार्यै ॥१८॥ एतेनगोदानंषोडशे
१३ वर्षेकेशान्तंश्मश्रूण्यान्कारयेच्छ्मश्रूणीहांदतिसंधिशिरोमास्यायुःप्रमोषीरिति मुखं २
केशश्मश्रुलोमनखान्युदक्संस्थानिकुर्वितिसंप्रेष्यैसाहस्त्यगाग्यतःस्थित्वाहःश्रेष्ठमा
चार्यसकाशेवाचंविसृजेतवरंददामीतिगोमिथुनंदक्षिणासंवत्सरमादिशेत् ॥१९॥ अ
ष्टमेवर्षेब्राह्मणमुपनयेद्गर्भाष्टमेवैकादशेक्षत्रियंद्वादशेवैश्यमाषोडशाद्ब्राह्मण
स्यानतीतःकालआद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊर्ध्वंपतितसावित्री
कामवंतिनैनानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरलंकृतंकुमारंकु राम
शलीकृतशिरसमहतेनवाससासंवीतमैणेयेनवाजिनेनब्राह्मणंरौरवेणक्षत्रियमाजेनवै १३
क्ष२

श्यंयदिवासांसिवसीरन्क्षौमानिवसीरन्काषायंब्राह्मणोमांजिष्ठंक्षत्रियोहारिद्रंवै
श्योस्तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्याविवैश्यस्यतेषांदंडाःपालाशो
ब्राह्मणस्यौदुंबरःक्षत्रियस्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितः
क्षत्रियस्यप्राणसंमितोवैश्यस्य ॥२०॥ सर्वेवासर्वेषांसमन्वारब्धेहुतेऽग्नेःप्राङ्
मुखआचार्योवतिष्ठतेपुरस्तात्प्रत्यङ्मुखइतरस्तेषामंजलावपःपूरयित्वातत्सवितुर्वरे
णीमहइतिप्रतिनास्यपूर्णमवक्षारयत्यासिच्यदेवस्यत्वासवितुःप्रसवेऽश्विनो
त १ र्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावितिस्वपाणिनापाणिं [illegible] गृह्णा

गृ॰ प॰ १४ यात्सविता ते हस्तमग्रभीदसाविति द्वितीयमग्निराचार्यस्तवासाविति तृतीयमा
दित्यमादृय देव सवितरेष ते ब्रह्मचारी तं गोपाय स मा मृत सत्याचार्यः कस्य ब्रह्मचार्य
सि प्राणस्य ब्रह्मचार्यसि कस्त्वा कमुपनयते काय त्वा परिददामीति युवा सुवासाः प
रिवीत आगादित्यर्द्धर्चेनेन प्रदक्षिणमावर्त्तयेत्तस्याध्यंसौ पाणिं कृत्वा हृदयदेशमा
लभेतोत्तरेणाग्निं परिसमुह्य ब्रह्मचारी तूष्णीं समिधमादध्यात्तूष्णीं वै प्राजापत्यं
बि २ प्राजापत्यो ब्रह्मचारी भवतीति विज्ञायते ॥२॥ अग्नये समिधमाहार्षं बृह राम
हते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहं ब्रह्मणा वर्चसा स्वाहेति समिधमाधा १४

याग्निमुपस्पृश्य मुखं निमार्ष्टि तेजसा मा समनज्मीति तेजसा ह्येवात्मानं स
मनक्तीति विज्ञायते मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां म
यीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु यत्ते अग्ने तेजस्तेनाहं
तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाहं हरस्वी भूया
समित्युपस्थायाजान्वाच्योपसंगृह्य ब्रूयादधीहि भोः सावित्रीं भो अनुब्रूहीति तस्मै वा
स पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्वां यथाशक्ति वाच
यीत हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति मम व्रते ते हृदयं दधामि मम चि

ग॰स्य॰ नमनुवाचेत्येतेऽअसुमवाचमेकवृत्तौजवसद्दस्यातिष्ठानेपुनःकुमद्यामानीरयमिव
१५ लामावधादं ऽ प्रशायब्रह्मचर्यमा॥ इ ग्रोढ्व्रह्मचार्यसधोशानकमेंकुर्॥ दिवामास्वाप्सी
एवाचार्याधीनो वेदमधीयीतनिवाद शवर्षाणि वेदब्रह्मचर्यं गृह्णा ततो वासायं प्रातर्मिदृं
तेसायं प्रातः समिधमादध्यात् प्रमाख्याधिनमग्नाभिक्षेतानोप्रसारव्याधिनीवाभवान्मि
क्षांदरा॥ तेस्य नुप्रवचनीयमितिवत्तदाचार्याय वेदयानंतिष्ठुदरूः शेषमन्नमितेब्र क्षेउ
ह्मोदनमनुप्रवचनीयं श्रपयित्वाचार्याय वेदयानं नोद्दायः समन्वारब्धेऽजुहुयात्सद राम
सस्पतिमद्भुतमिति साविश्या इतोर्थं यद्यालंचानरुध्वमनुकंस्यादशाषभ्यन्नतीत १५

सोविश्वकृतं चतुर्थं बालमणान्भोजयित्वा वेदसमाप्तिं वाचयीतांतरूर्ध्वमक्षारालवणा
प॰२ शीब्रह्मचार्यध्यायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा धारितब्रतायमेधाजननंकरोत्यनिंदि
तायां दिश्येकमूलं पलाशं कुशास्तंबं वा पलाशापचारे प्रदक्षिणमुदकुंभेनैत्रिः
परिषिंचंतवाचयति सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा ऽअस्येवं मां
सुश्रवः सौश्रवसं कुरु यथा त्वं देवानां यज्ञस्यनिधिपो ऽस्येवमहं मनुष्याणां वेद
स्यनिधिपो भूयासमिति तेन वापनादि परिदानांतं ब्रतादेशनं व्याख्यातमित्यनुपेत
पूर्वस्यार्थोपेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं चानिरुक्तं परिदानं कालश्चेत

Indira Gandhi National Centre for the Arts

१
ग०ब्रा०
१६

चिन्तुर्वर्तते महऽइति ॥ सावित्रीः ॥२३॥ ऋत्विजो वृणीते अन्यूनानतिरिक्तांगान्येमात् तलः
पितृतश्चेति यथोक्तं पुरस्ताद् घन ऋत्विजो वृणीत इत्येके ब्रह्माणमेव प्रथमं वृणीते
थ होतारमथाध्वर्युमथोद्गातारं सर्वान्वा यैर्हीनैकाहैर्याजयंति सदस्यं सप्तदशं कौषी
तकिनः समामनंति स कर्मणामुपद्रष्टा भवतीति तदुक्तमृग्भ्यां यज्ञ ऋत्विजो बहुधा
कल्पयंतम् इति होतारमेव प्रथमं वृणीते अग्निर्मे होता स मे होता होतारं त्वामुं वृण इ
ति होतारं चंद्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वामुं वृण इति ब्रह्माणमादित्यो मेऽध्वर्युरि ॥राम॥
त्यध्वर्युं पर्जन्यो म उद्गातेत्युद्गातारमापो मे होत्राशंसिन्य इति होत्रकांश्चरश्मयो मे चमसाध्वर्यव
१६

इति चमसाध्वर्यूनाकाशो मे सदस्य इति सदस्यं स हूतो जपेन्मह्द् मे वोचो भर्गो मे वोचो भ
र्गो मे वोचो यशो मे वोच स्तोमं मे वोचः क्लृप्तिं मे वोचो भुक्तिं मे वोचस्तृप्तिं मे वोचः सर्वं
मे वोच इति जपित्वाग्निष्टे होता स ते होता होता इति मानुष इति होतारं प्रति जानीते च
द्रमास्ते ब्रह्मा स ते ब्रह्मा स एव मितरे यथादेशं तत्रामवनेत्रमा वेशान्ते तेन भक्षिषी
येति च याजयिष्यन्त्समार्त्विज्यमकामयेत दीक्षितो नोच दक्षिणास्ववाधितस्यान्
रसं यक्ष्मगृहीतस्यानुदेश्याभिशस्तस्य क्लृप्तिमयोनेरिति चैते वर्लोमप्रवाकं परि
पृच्छेत् कोऽयम कऋत्विजः कादाक्षिणेति कस्यातोऽसदसं प्रयोगोनमी समन्न

स्यर

ग.सू. र्यनो ह्वियमनुपेद्धराकनोरूपवर्गो हैतेनाग्नेज्ञदलाबाहघस्वेतिदाक्षिणाः ग्नावाज्या
१२ द्धातेि द्धलीयय्यार्थेप्रव्रजेदेवमनाद्दिताग्निर्गृह्येर्मामग्नेशरणोमाःमृषोनद्दले
नयक्षौ॥२४॥आलिजोहृत्वामधु पर्कमाद्देरत्नातकायपास्थिताय राज्ञेचाचा
र्यश्वशुरपितृव्यमातुलानांचदधानेमध्वानायसर्पिर्वामध्वलाभे।विष्टरः
पाद्यमर्घ्यमाचमनीयंमधुपर्कोगौरित्येतेषांत्रीस्त्रीरेकैकंवेदयन्तेविष्टर्
सजातानांविद्युतामिवसूर्य।इदंतमाधितिष्ठामियामेकश्चाभिदासतीत्युदगग्रविष्टरउपविशेदाक्रम्यवापादोप्रक्षालयीतदाक्षिणमग्रे अ.५ ख. १२

त्राह्मणायप्रथमंसव्यंशूद्रायप्रक्षालितपादोऽर्घ्यमञ्जलिनाप्रतिगृह्याचमनीयेना
चामेत्यमृतोपस्तरणमसीतिमधुपर्कमाह्रियमाणमीक्षेतमित्रस्यत्वाचक्षुषाप्र
तीक्षेइतिदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीति
तदञ्जलिनाप्रतिगृह्यसव्येपाणौकृत्वामधुवाताऋतायतइतित्र्यृचेनावेक्ष्यानामि
कयाचाङ्गुष्ठेनचत्रिःप्रदक्षिणमालोड्यवसवस्त्वागायत्रेणछन्दसाभक्षयन्त्वितिपु
रस्तान्निमार्ष्टिरुद्रास्त्वात्रैष्टुभेनछन्दसाभक्षयन्त्वितिदक्षिणतआदित्यास्त्वा
जागतेनछन्दसाभक्षयन्त्विपिश्चाद्विश्वेत्वादेवाआनुष्टुभेनछन्दसाभ यन्त्व
क्ष१

गृ. सू. १८ तुत्तरतोऽग्नेरेतेभ्यस्त्वेतिमध्यात्पूर्वार्धाच्चैवेतजोरोहोसीतिप्रथमंप्राश्नातो हिरण्यो
दाद्मशापयतिद्विस्ताव मपिदारूप्रधारो देवराजेरनिननीयेनसर्वेनतत्प्रियं छै
कास्तरणापादः । छेदं प्रयच्छेदलानेसु सर्वं वा याचमनापेनान्वाचामेत्समला
पिधानमसाविमसंयशः आमावेआः अयतां मितिद्वितीयमाचा तादका द
गोवेदनं नेहत्तोमपाप्मापाप्मामदत्तुइतिजपित्वा कुरुतेतिकारादिप्रश्नमातान्ड्डा
रांदुद्दितावसना मितिजपित्वोमुच्चजनतासत्सत्पन्नामा सोमद्वापकोभवति । राम
मर्यादिर पा। इत्याश्वलायनगृह्यवृत्तौ प्रथमोऽध्यायः ॥ ॥आश्वलायनीयो ग्रामस्थो १८

अवणाकर्मसिद्धस्तक्तूनानेवंकलशं पूरयित्वादर्वीं च सक्तूणां निर्वापशक्तोनेदधी
सक्तुधाना कृत्वालीर्पिपाधीश्रनन्धे लामिने स्थाली पाक आपायित्वैककपालं
त्रपुरोडाशमग्नेनयसपपस्याग्नये अस्मात् ना नेचनस तिः प्रत्यक्चंक्रलांपाणिनैकपा
लेमनुतायनोमायस्वाहेत्स विमन्तस्पादावि:पक्षोर्वीमानाअग्ने वसुजो
अग्नेयेस्तनमाग्नायेनानिजहो। तेशान्तोभवेत्तुत्राजिनोदर्वाधिसक्तधानाः अ
जातिनामाग्नेभ्यंरनपादद्यात्कलशात्सक्तूनांदर्वीपूरयित्वाप्रागुपानिष्क्रम्य
गृहाद्देशापोवनिनीयसर्पदेवजनेभ्यः स्वाहेतिहुत्वानमस्करो ति

गृ.सू. ये सर्पाः पार्थिवा ये अंतरिक्ष्या ये दिव्या ये दिश्यास्तेभ्य इमं बलिमाहार्षं तेभ्य इ
१६ मं बलिमुपाकरोमीति प्रदक्षिणं प।।सर्पश्चाद्भन्नरूपाविश्वसर्पोसि सर्पेणां
सर्पाणामधिपतिरस्यन्नेन मनुष्यांस्त्रायसे पूपेन सर्पान्यज्ञेन देवांस्त्वयि मा
संतं त्वयि संतः सर्पा मा हिंसिषुः ध्रुवानेतं परिददामीति ध्रुवामेतं ध्रुवा मंतरे
समास्यानन्नुपूर्वं ध्रुवमेनं परिददामीत्यात्मानमंततोनेन मंत्रेणाव्यवधायाप बे
रिदानीं सर्पदेवजनेभ्यः स्वाहेति सायं प्रातर्बलिं हरेदाप्रत्यवरोहणात् राम
संख्याय दर्केनादनेनाबलीलिंदद्यादेनापद्धरोनाः ।। आश्वयुज्यामाश्वयु १८

जाकर्मानिवेशनमसंकटं स्नाताः शुचिवाससः पशुपतये स्थालीपाकं निरुप्य जु
हुयुः पशुपतये शिवाय शंकराय पृषातकाय स्वाहेति पृषातकमंजलिनाजुहु
यादूनं मे पूर्यतां पूर्णं मे मोपसदत्पृषातकाय स्वाहेति सजूर्ऋतुभिः सजूर्विधा
भिः सजूरिंद्राग्निभ्यां स्वाहा।। सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वेभ्यो देवेभ्यः
स्वाहा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृथिवीभ्यां स्वाहेत्याहिताग्ने
ग्र राग्रयणः स्थालीपाकेनाहिताग्नेरावृतानाग्नेः।। श्यामाकैः पूर्वोपशुराश्वावसवे नौ
दतं चतुर्दश्यां पौर्णमास्यां वा निवेशनं पुनर्नवीकृत्य स्थलेपणस्तरणोपलेपनं

गृ.प. रस्तामितेनायसस्यजदुयुरंपश्वंतपुदाजंद्विप्रवैणाचापरोणिवैसंसचुवारुं णीरि
२० पाः मुखोस्यराजन्वोधवी स्वाहोनुवप्सुतेश्वाध्यागृरोदजंवोनुकिंचुनप्सवता
थवेदावौयनमः स्वाहेतिनात्रसौविष्टकृदंभयन्तः प्राजापत्यभ्याम्रयादिहा
ग्निमाग्नमाणोजपान्तीशिवोनः सुमनाभवेतिद्दमंतंमनसाध्यायीत्पश्चाद्ग्नेः
स्वस्तरः स्वास्तीर्णोस्तास्मिन्नुपविश्यस्योनापृथिविभवेतिजपित्वासंविशेत्सामात्तम
सः प्राक्शिरा उद ङनुखोवध्वादक्षपाणिमंत्रंज्याधाज्यायान्वीनंतरोमंत्रवि २०

दोमंत्रांजपेयुः संहाय्याँमोदेवाअवंतुनइतित्रिरेतांदक्षिणामुखोः प्रत्यङ्मुखोवाउ
दङ्मुखोश्वतुर्थसंहायसौयोवाणिस्वस्त्ययनानिवजापित्वाग्निंसंस्कृत्यब्राह्मणा
न्भोजयित्वास्वस्त्ययनंवाचयीत ॥ २ ॥ इमंतामिशिरयोक्त्रुणीमपरपक्षाणांमष्ट
मीष्टकाएकस्यांवाप्रवैघःपित्न्योदधौदोदनंह्लसरंपायसंचनःशाणव
स्यवापूर्णानुदारनामवरडस्परासहदक्षिणाभेऊखोयावतानिवोकाम यीतोय
श्वोभूतेष्टकाः पशुनास्थालीपाकेनवाध्यनडहोयवसमाहरेदग्निनावादहे
दुपोपैदधामेष्टकातेनत्वेवानएकस्यांतादेकेवैश्वदेवीबुवतेआग्नेयीमेकेस्था

गृह्य· २१

यामेकं प्राजापत्यामेवं ... रात्रिदेवतामेवं नक्षत्रदेवतामेकं ऋतुदेवतामे
कं पितृदेवतामेकं पशुदेवतामेकं पशुकालेन पशुं संज्ञप्य प्रोक्षणोपाकरणं वर्जं
वपाम् । अथ जुहुयाद् वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके मे
दसः कुल्या उप तान् स्रवन्तु सत्या एता आशिषः संतु सर्वाः स्वाहेति यथावदाना
नां स्थालीपाकस्य चाग्निना पशुपचाराणि पश्चात् स्वानि इति । इमाः प्रीष्मादि ऋतवः शि
वानो वर्षाः शिवा अभया शरन्नः । संवत्सरोऽधिपतिः प्राणदो नोऽहोरात्रे कृण्
रात्र २१

णुतां दीर्घमायुः स्वाहा ॥ शांता पृथिवी शिवमंतरिक्षं द्यौर्नो देव्यभयं नोऽअस्तु ॥
शिवा दिशः प्रदिश उद्दिशो न आपो विद्युतः परिपांतु सर्वतः स्वाहा ॥ आपो मरीचीः प्र
वहंतु नो धियो धातारः समुद्रा वहंतु पापं ॥ भूतं भविष्यद् भयं विश्वमस्तु मे ब्रह्माधि
गुप्तं स्वाराक्षराणि स्वाहा ॥ विश्व आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतः सदंतु ॥
ऊर्जं प्रजाममृतं पिन्वमानः प्रजापतिः ... परमेष्ठी दधातु स्वाहा ॥ प्रजापतेन
त्वदेतान्यन्यः ॥ सौविष्टकृत्यष्टमीं ब्राह्मणान्भोजयेदित्युक्तं ॥ ५ ॥ अपरेद्युरन्वष्ट
क्यं तस्यैव मांसस्य प्रकल्प्य दक्षिणाप्रवणेऽग्निमुपसमाधाय परिस्तीर्य ... योत्तर

१०ख तः परिश्रितस्यद्वारं कृत्वा समूलं बर्हिः स्तिरपसलैरविधन्वन्परिस्तीर्य हवींष्या
२२ सादयेदोदनं कृसरं पायसं दधि मंथान्मधुमंथांश्च पिंडपितृयज्ञकल्पेन हुत्वा म
धुमंथवर्जं पितृभ्यो दद्यात्स्त्रीभ्यश्च सुराचामामित्यधिकं कर्षूष्वेकै द्वयोः षट् मा
सु वा पर्वसु पितृभ्यो दद्यादपरासु स्त्रीभ्य एते न माघ्यां वर्षं प्रोष्ठपद्यामपर ध्या
पक्षे मासि मासि चैवं पितृभ्यो युक्तु प्रतिष्ठापयेन्नवावरान्भोजयेदयुजो वा
युग्मान्वा वृद्धिपूर्तेषु युग्मानितरेषु प्रदक्षिणमुपचारो यवैस्तिलार्थः ॥५॥ स्थ रामः
मारोहयेन्नानापाणिभ्यां चक्रे अभिमृशेदहं ते पर्वपादावारभे दृढ्रथं त ॥२२॥

रे ते चक्रे वामदेव्यमक्ष इत्यक्षाधिष्ठाने दक्षिणापर्यान्यामारोहेद्वायोष्ट्वावी
र्येणारोहामीतींद्रस्यौजसाधिपद्येनेतिरश्मीसंमृशेदश्विनिकान्चीदंडेन ब्रह्म
णो वस्तेजसा संगृह्णामि सत्येन वः संगृह्णामीत्यभिप्रवर्तमाने भुजपे सह
२५४ स्व सनिं वाजमभिवर्तस्वेदेवप्रावर्तवनस्पते वीड्वंगो हि भूया इत्येतयान्यान्य
पि वा नस्यत्यानि च्छिरोगावो भवतां वीड्रु रक्ष इतिरथांगमभिमृशेत्सुत्रामा
णां पृथिवीं द्यामनेहसमितिनावं नवस्थेनं यशास्विनं वृक्षेद्रुदं वा विदासिनें
प्रदक्षिणं कृत्वा फलवतीः शाखा आहरेदन्यद्वाकौ दुंबसंसदमुपयायादस्मा

गृ॰सू॰ कमुत्तमं रुधींसादित्समीक्षमाणोनपिच्यावरोहेदृषभं मासमानानामित्य
२३ भिक्रामं च यमद्येंद्रस्य वेश्माईयस्तं पाप्मादिद्येत हो दिवो दुहितरो विभातीराति
बुशा यां॥८॥ अथातो वास्तुपरीक्षानूखरमविव दिकुसमौषधिवनस्प
तिवद्यस्मिन्कुशावीरिणं वम्भलंकंटकिक्षीरिण समूलान्परिखायोद्धर
येदपामार्गः शाकस्तिल्वकं परिव्याध इति चैतानि यत्र सर्वत आ
पो मध्यं समेत्यं प्रदक्षिणं शायनीयं परीत्य प्राच्य स्यंदेरन्नभ्रवदस्यतास्स साम
वं समवंसमवस्त्रवेभक्तशरणं कारयेदेवंभूतं भवति दक्षिणाप्रवणे सभा २३

मापयेत्साधुलाह भवति युवानस्तस्यां विजनवां कलहिनः प्रमायुकाभ
वंति यत्र सर्वतऽऽपः प्रस्यन्देरन्स्वस्त्ययन्यद्घताच॥७॥ अथैतैर्वास्तु
परीक्षेत जानुमात्रं गर्तं खात्वा तैरेव पांसुभिः प्रतिपूरयेदधिके प्रश
स्तं समे वार्त्तं न्यूने गर्हितं मस्तमिते पांसुर्णं परिवासयेत्सोदके प्रश
स्तं माद्वेवार्त्तं शुष्के गर्हितं श्वेतं मधुरास्वादं सिकं तोत्तरं ब्राह्मणस्य लो
हितं क्षत्रियस्यं नीलं वैश्यस्य तासहस्त्रसीलकं चौयथादिक्समचतु
रस्त्रं मापयेदायलचतुरस्रं वातच्छमीशाखयोदुंबरशाखयावो

१०प्र० शंतातीयेनत्रिःप्रदक्षिणंपरिव्रजन्नोक्षंस्वविच्छिन्नयाचोदकधारया
२४ पोहिष्ठामयोभुवइतितृचेनवंशांतरेकुशारणानिकारयेद्गर्तेध्रुवकां
शीपालमित्यवधापयेन्नास्यदाहुकंभवतीतिविज्ञायतेमध्यमस्थूणा
यागर्त्तेवधायप्रागग्रै दर्भकुशानास्तीर्यव्रीहियवमतीरपआ
सिंचयेदच्युतायभौमायस्वाहेत्यथेनामुच्छ्रीयमाणामनुमंत्रयेत
हैवतिष्ठनिमितातिष्ठिलास्त्वामिरावतीमध्येपोषस्यंतितिष्ठली।।आत्वा राम
प्रापन्नधायवआत्वाकुमारस्तरुणआवत्सोजगतासह।।आत्वाप २४

रिस्रुतःकुंभआदध्नःकलशैरयंनिति।।८ ।।वंशमाचीयमानंमृतेन
स्थूणामाधिरोहवंशा द्राघीयआयुःप्रतरंदधानाइतिसर्वासुचतसृषु
शिलासुमलिकंप्रतिष्ठापयेत्पृथिव्याअधिसंभवेत्यग्निरोवांवदातित्रे
धाबद्धोवेस्त्वया।।इरामुदहप्रशंसंत्यनिरामपबाधतामित्यथास्मिन्नपआ
सिंचयेदेतुराजावरुणोरेवतीभिरस्मिंस्थानेतिष्ठतुमोदमानःइरांव
हंतोघृतमुक्षमाणामित्रेणसाकंसहसंविशंत्वित्यथैनच्छमयतिव्रीहि
यवमतीभिरद्भिर्हिरण्यमवधायशंतातीयेनत्रिःप्रदक्षिणंपरिव्र

Indira Gandhi National
Centre for the Arts

गृ०सू
२५
जन्वोक्षंस्यविच्छिन्नयाचोदकधारयापोहिष्ठामयोभुवइतितृचेनम
ध्येगारस्यस्थालीपाकंश्रपयित्वोवास्तोष्पतेप्रतिजानीह्यस्मानिति
चतसृभिः प्रत्यृचंजुहोतिनित्यः त्वेषभगणाभोजुपित्वाशिवंवास्त
शिवंवास्त्वितिवाचयीत॥ ९॥ उक्तंगृहप्रपदनंबीजवलीगृहान्प्र
पद्येतक्षेत्रंप्रकर्षयेदुत्तरैः प्रोष्ठपदैःफल्गुनीभीरोहिण्यावाक्षे
त्रस्यानुवातंक्षेत्रस्यपतिनावयमितिप्रत्यृचंजुहुयाद्भूपेह्वागाः राम
प्रतिष्ठमाअनुमन्त्रयेतमयोभूर्वातोअभिवातूस्राइतिद्वाभ्यां २५

मायातीर्यास्रामधुभ्रतुर्बिलमधोः पूर्णीघृतस्यचं॥ तानः संतुपयस्वती
र्भिनोगोष्ठेघृतांच्यः॥ उपमैतुमयोभुवऊर्जेचौजश्चबिभ्रतीः॥ दुहानाअ
क्षितंपयोमयिगोष्ठेमयिगोष्ठेनिविशध्वंयथानवाम्युत्तमोयादेवेषुतन्त्व
नैरयंतेतिचस्तत्करोबमागावीयमेकेगणानासाञ्जपतिष्ठेतागुरूगवीनांम
स्ना ३ तास्थवरास्थशोभनाःप्रियाःप्रियोवोभूयासं रामयिजानीध्वंरामयिजानी
ध्वं॥ १०॥ छ॥ ॥ इतिआश्वलायनगृह्यसूत्रेद्वितीयोध्यायः॥ ॥ छ॥ ॥
॥ छ॥ हरिः ॐ३म्॥ ॥ अथातः पंचयज्ञादेवयज्ञोभूतयज्ञःपितृयज्ञोब्रह्मयज्ञो

ग्र.सू. मनुष्ययज्ञ इति तद्यदग्नौ जुहोति स देवयज्ञो यद्बलिं करोति स भूतय
२६ ज्ञो यत्पितृभ्यो ददाति स पितृयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यन्मनुष्ये
भ्यो ददाति स मनुष्ययज्ञ इति तानेतान्यज्ञानहरहः कुर्वीत ॥१॥ अथ स्वा
ध्यायविधिः प्राग्वोदग्वा ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवी
त्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मु
ख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवन्तौ विज्ञा राम
यते पावा एष ओषधीनां रसो यद्दर्भाः सरसमेवैतद्ब्रह्म करोति द्या २६
सो१

वापृथिव्योः संधिमीक्षमाणः संमील्य वा यथा वा युक्तमात्मानं मन्येत तथा
युक्तोऽधीयीत स्वाध्यायं मोम् पूर्वं व्याहृतयः सावित्रीमन्वाह पच्छोऽर्धर्चशः
पी३ सर्वामिति तृतीयं ॥२॥ अथ स्वाध्यायमधीत ऋचो यजूंषि सामान्यथर्वाङ्गि
रसो ब्राह्मणानि कल्पान्गाथा नाराशंसीरितिहासपुराणानीति यदृ
चोऽधीते पय आहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामा
नि मध्वाहुतिभिर्यदथर्वाङ्गिरसः सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान्गा
थानाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोऽधीते पयसः

Indira Gandhi National Centre for the Arts

ग॰ घ
२८

कुल्या अस्य पितृन्स्वधा उपक्षरंति यद्यजूंषि घृतस्य कुल्या यत्सामानि म
घ्वः कुल्या यदथर्वांगिरसः सोमस्य कुल्या यद्ब्राह्मणानि कल्पान्गाथा नाराशंसी
रितिहासपुराणानी अमृतस्य कुल्याः स यावन्मन्येत तावदधीत्यैतया परिदधाति न
मो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ॥ नमो वाचे नमो वाचस्प
तये नमो विष्णवे महते करोमि ॥ २ ॥ देवतास्तर्पयति प्रजापतिर्ब्रह्मा वेदा
देवा ऋषयः सर्वाणि छंदांस्योंकारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावा
पृथिवी अंतरिक्षमहोरात्राणि संख्याः सिद्धाः समुद्रा न ॥ घो गिरयः क्षे राम
२८

त्रौषधिवनस्पतिगंधर्वाप्सरसो नागा वयांसि गावः साध्या विप्रा यक्षा
रक्षांसि भूतान्येवमंतान्यथ ऋषयः शतर्चिनो माध्यमा गृत्समदो विश्वा
मित्रो वामदेवो त्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ता महा
सूक्ता इति प्राचीनावीती सुमंतु जैमिनि वैशंपायन पैल सूत्र भाष्य
भारत महाभारत धर्माचार्या जानंति बाहवि ... गार्ग्य गौतम
शाकल्य बाभ्रव्य मांडव्य मांडूकेया गार्गी वाचक्नवी वडवा प्रातिथेयी ती
सुलभा मैत्रेयी कहोलं कौषीतकं महाकौषीतकं पैंग्यं महापैंग्यं सु

Indira Gandhi National Centre for the Arts

गृ०घ यत्तंसांख्यायनेमैतरेयंमहैतरेयंशाकलंबाष्कलंसुजातवक्त्रमौद
२८ वाहिंमहौदवाहिंसौजामिंशौनकमाश्वलायनंयेचान्येआचार्यास्ते
सर्वेतृप्यंत्वितिप्रतिपुरुषंपितॄंस्तर्पयित्वा गृहानेत्य यद्ददातिसादक्षि
णाथापिविज्ञायतेसयदितिष्ठन्व्रजन्नासीनःशयानोवायंक्रतुमधीते यं
तेनम्य तेनहास्यक्रतुनेष्टंभवतीतिविज्ञायतेतस्यद्वावनध्यायौयदात्माशुचि
र्यद्देशः ॥४॥ अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रवणेनश्रा
वणस्यपंचम्यांहस्तेनवांऽज्यभागौहुत्वाज्याहुतीर्जुहुयात्सावित्र्यैब्रह्म २८

णेश्रद्धायैमेधायैप्रज्ञायैधारणायैसदसस्पतयेनुमतयेछंदोभ्य
ऋषिभ्यश्चेत्यथदधिसक्तूञ्जुहोत्यग्निमीळेपुरोहितमित्येकाकुसुं
भकस्तदब्रवीदावदंस्त्वंशकुनेभद्रमावदंगणानांत्वागमदग्नेनाधा
मंतेविश्वंभुवनमधिश्रितंगंतानोयज्ञंयज्ञियाःसुरामियोनःस्वोभ
रणा६इतिविच्छविच्छचाग्नेयाहिमरुत्सखायंत्वेराजंधुनंदविपतिद्धचाः
समानीवआकूतिरित्येकातच्छंयोरावृणीमहइत्येकाध्येषमा
ध्यायेर्न्वाःर्व्धैएताभ्योदेवताभ्योजुहोमिसौविष्टकृतंजुहोतिदधिसक्तून्प्रा

ग०घ्र०आ स्यंततोमार्जनंमपुरःप्राग्निंगाकूलेषुंदर्भेषुपविश्योदंपात्रेदर्भान्कृत्वोब्र
२९ ह्मांजलिकृतोजपेदोंपूर्वव्याहृतयःसावित्रीचानिरभ्यस्यवेदादिमारभेत
थोस्तर्गेषण्मासानधीयीतसमावृत्तोब्रह्मचारिकल्पेनयथान्यायमितरे
जायोपेयस्येकेप्राजापत्यंतद्वार्षिकमित्येतदाचक्षते मध्यमाष्टकायामेत
न्योदेवताभ्योन्नेनकुचापोभ्यववंयेतारवदेवतास्तर्पयंस्याचार्यान्ऋषी
न्पितृंश्चेतद्उत्सर्जनं॥५॥अथकाम्यानांस्थानेकाम्याश्चस्वस्त्यानवका
मानांनी त्यथव्याधितस्यातुरस्य यक्ष्मगृहीतस्यचोषडकुतिश्च राम २९

रूर्मेचामित्याहविषाजीनायकमित्येतेनेस्वन्नमनोज्ञंदष्ट्वोंघानोदे
वसवितरितिद्वान्योयचगोषुकुमितिपंचभिरादित्यमुपतिष्ठते
योमेराजन्युज्यावासरवानेतिवोंद्भुचाटंमित्यांमनोज्ञंदष्ट्वापापकं
घमाघायौक्षिस्पंदनेकर्णध्वननेस्तुचक्षाअहमक्षीभ्यांमयासंस्व
र्चामुखेनस्तुश्रुत्कर्णाभ्यां मयिदक्षक्रतुःइतिजपेदगमनीयग पं ५
त्वायाज्यंयाजयित्वाभोज्यंभुक्त्वाप्रतिग्राह्यंप्रतिगृह्यचैत्यंयूपचोपहत्य
पुनर्मामैत्विंद्रियंपुनरायुःपुनर्भगः॥पुनर्द्रविणमैतुमांपुनर्ब्राह्मण

Indira Gandhi National Centre for the Arts

ग्नि

ग० घ मेतु मां स्वाहा ॥ इमे घेधिस्वआसो अग्नयो यथास्थानमिहकल्पतां ॥ वै

३० श्वानरो वा दृष्यानो ऽर्यछलु मेमनो ऽघंतरमप्रतस्यकेउः स्वाहेत्याज्य

कुतीजुहुयात्समिधो वाजपेद्दा ॥ ६ ॥ अव्याधितंचेत्स्वपंतं मादित्योभ्यु मुपया न

स्तमियो वाग्यतोनुपविशैरात्रि शेषं न्तृचा येनस्त्वर्यज्योतिषा बाध

स्तेतमइतिपंचाभिरादित्यमुपतिष्ठेतां न्युदियाचेदेकमेश्चांतमनभि

रूपेण कर्मणा वाग्यतइतिसमानमुराभिश्चतस्त्रभिरूपस्थानं यज्ञोप राम

वीतीनित्योदकः संध्यामुपासीत वाग्यतस्सायं ... मुत्तरापराम ३०

भिमुखो ऽंच धमदेशं सावित्रीं जपेदृश्तास्तमिते मंडलआ नक्षत्रदर्शना

देवं प्रातः प्राङ्मुखस्तिष्ठन्ना ... मंडलदर्शनात् कपोतश्चे दगारमुपह न्या

न्यादनुपतेद्वा देवाः कपोतइतिप्रत्यृचं जुहुयाज्जपेद्वावयमु चापप्रसपत

इर्यर्थचर्यां चरिष्यन्सं प्रेषन्विदुषेतिनक्षमधिजिगांतिषन्नल्होवासंपृष्ठ दोप

न्धवन इति मल्लात मधानमेष्यंन्प्रतिनयंवा ॥ ७ ॥ यैतान्युपक

ल्पयीत समावर्तमानो मणिकुंडलेवस्त्रयुगं छत्रमुपानद्युगं दंडं स्रज

मुन्मर्दनमनुलेपनमांजनमुष्णीषमित्यात्मनेचाचार्याय चयद्युम

गृह्यसूत्र

३१ योनोविद्वेषीवाचायौवसमिधंचाहरेदेवपराजितायांदिशियज्ञियस्य
वृक्षस्यार्द्रामन्नाद्यकामःपुष्टिकामस्तेजस्कामो वा ब्रह्मवर्चस
कामउपवातामन्नमयीमुमयकामंउपरिसमिध्यंकृत्वागोमन्नंचब्रा
ह्मणेभ्यःप्रदायगौदानिकंकर्मकुर्वीतांसमनिमंत्रान्संनमयेद्दिक्कु
तकेनशीतोष्णाभिरद्भिःस्नात्वायुवंवस्त्राणिपीवसावसाथेइत्यहतं
वाससीआच्छाद्य[illegible]मनस्तेजोसिचक्षुर्मेपाहीतिचक्षुषीआंजयीतातेम
नस्तेजोसिश्रोत्रंमेपाहीतिकुंडलेआबध्नीतान्नुलेपनेनपाणी ३१

मिधा ३

३२ प्रलिप्यमुखमग्रेब्राह्मणोनुलिंपेद्बाहू [illegible] जन्यउदरंवैश्यउपस्थं
स्त्रियःस्पर्शजांगे नौनाम्नोस्यना[illegible]मयास[illegible]स्रजमपि
बध्नीतेनमालोकामालेतिचेद्युसुःस्वमित्य पयीतदेवानांप्रतिष्ठेस्थः
सर्वतोमापातमित्युपानहावारोहोयदिवच्छत्रासीतिछत्रमादत्ते
वेणुरसिवानस्पत्योसिसर्वतोमापाहीतिवेणवंदंडमायुष्यमिति
स्रजंमणिंकंठेप्रतिमुच्योपकृत्यातिष्ठन्त्समिधमादध्यात्॥ ८॥
स्मृतंनिंदाचविद्याचश्रद्धाप्रज्ञाचपंचमी॥इष्टंदत्तमधीतंचकृतं

Indira Gandhi National Centre for the Arts

[स]
सत्यंश्रुतंव्रतं।।यदग्नेसेंद्रस्यंप्रजापतिकस्यंसऋषिकस्यस
ऋषिराजन्यस्यसपितृकस्यसपितृराजन्यस्यसमनुष्यस्यस ३२
मनुष्यराजन्यस्यंसाकाशस्यसाकाशस्यसान्तकाशस्यसप्रती
काशस्यसदेवमनुष्यस्यसगंधर्वाप्सरस्कस्यंसहारण्यैश्चप
शुभिर्ग्राम्यैश्च यन्मआत्मनआत्मनिव्रतंतन्मेसर्वव्रतंमि
दंमहमग्नेसर्वव्रतोभवामिस्वाहेतिनमाग्नेवचइतिवस्त्रच
समिधोभ्यादध्यादेतेनप्रजापिष्यंतोभवतितत्रैतांरात्री ३२

वसैद्ध्वियांलेगुरुमर्थेननिमंत्र्यैकृतान्तुज्ञालस्यवास्त्र।नंतस्यैला
निव्रतानिभवंतिननक्तंस्नायान्ननग्नःस्नायान्ननग्नःशायी
तनैग्नांस्त्रियमीक्षेतान्यत्रमैथुनाद्वर्षतिनधावेन्नवृक्षमारो
हेन्नकूपमवरोहेन्न बाहुभ्यांनदींतरेन्नसंशयमभ्यापद्येतम
हद्वैभूतंस्नातकोभवतीतिविज्ञायते।।६।।गुरुवेवस्त्र
क्ष्यमाणोनातुप्रब्रुवीतेदंवस्त्यामोमोदयुचैरूर्ध्वनाम्नःप्राण
पानयोरुपांश्चामद्वैरिंद्रहरिभिरिति चातोवृद्धोजपतिप्राणा

Indira Gandhi National Centre for the Arts

गृह्य
३२

पानयोरुरुव्यचास्तया प्रपद्ये देवाय सवित्रे परिददामीत्यृचं चैमा
यो प्रावस्यस्तीति जपित्वा माहित्रीणामित्यनुमंत्र्यैव मतिरुछ्र्यं
न कुतश्छिद्रयं भवतीति विज्ञायते व यस्ताम मनो ज्ञा वाचः श्रु
त्वौकनिक्रदज्जनुषं प्रब्रुवाण इति सूक्ते जपेद्देवीं वाच मजन
यंतदे वाइतिचं सूक्तं हि श्रुतं गर्तसदं युवानामिति मगस्य यस्या
दिशो बिभीयाद्यस्माद्वा तादिरमुत्सुकमुभं यतः त्वदीपं त्रय
स्येन्मं शाथं वसव्य मालोक्यां भयं मित्रावरुणा मह्यम स्त्वाचि बारो

राम
३२

पृथिव्यंतरि... श्चंद्रोर्दि आपः प्र
जावेदाः

ऋन्दहंतं व्रतीत्ये मा ज्ञाता रं मा प्रतिष्ठां विंदंतु मिथो भिंदाना उभयं
तु मत्युमितिसंस्रष्धनमु भयं समाकृतमिति मंथन्यं चं करोति ॥१०॥
सर्वतो न यादनाहातोद् श्रावाज्याकुती जुहुयात्पृथिवी वृता साग्निना
वृता तया वृत तयावृत्यी यस्माद्भूयाद्विभेमि तद्वारये स्वाहा ॥ अंतरिक्षं
वृतं तद्वायुना वृतं तेन वृतेन वत्रेनं यस्माद्भयाद्विभेमि तद्वारये स्वा
हा ॥ द्यौर्वृता सादित्येन वृता तया वृत तयावत्र्यां यस्माद्भयाद्विभेमि त
द्वारये स्वाहा ॥ दिशो वृतास्ताश्चंद्रमसा वृतास्ता वृता भिर्वत्रौ मि यं

Indira Gandhi National
Centre for the Arts

ग.सू. स्मोद्गूयाद्धिमेमितद्वारयेस्वाहा ॥ आपो॰ वृता स्तावरुणेन वृतास्ताभिर्वृता
३४ भिर्वत्रैर्भिर्यस्माद्गूयाद्धि मे मितद्वारयेस्वाहा ॥ प्रजा वृतास्ता प्राणेन वृ
तास्ताभिर्वृताभिर्वत्रैर्भिर्यस्माद्गूयाद्धि मे मितद्वारयेस्वाहा ॥ वेदा वृ
दूया ३ तास्तेश्छंदोभिर्वृता स्ते वृतैर्वत्रैर्यस्मा     द्धि मे मितद्वारयेस्वाहा ॥ स
र्वं वृतं तद्ब्रह्मणा वृतं तेन वृतेन वत्रेण यस्माद्गूयाद्धि मे मितद्वारये
स्वाहेत्यथाप राजितायां दि श्यवस्थाय स्वस्त्यात्रेयं जपति यतइंद्र राम
भयामह इति च स्त्यरं ग्रोबं ॥ ११ ॥ संग्रामे समुपोढे राजानं संना ३४

कृयैदावाहा पर्मं तद्देधानिपश्चाद्रथस्याव स्थायं जीमूतस्येव भवतिप्रती
कमिति कवचं प्रयच्छेद्रुत्तरया धनुरुत्तरां वाचयेत्स्वयं चतुर्थीं जपे पंच
म्येषुधिं प्रयच्छेदभिप्रवर्तमानं षष्ठीं सप्तम्या श्वाननष्टमीमिषू नवे
क्षमाणं वाचयेत्स्य हि रिवभो गैः परितो त्विबाहुमितितलेन स्यमानेमथे
न सारयमाणमुपारुह्याभीक्त्वं गा वाचयति प्रयो वां मित्रावरुणेतिच
द्वे अथैनमन्वीक्षेता प्रतिरथ अनश्वास सौपर्णैः प्रधारयंतु मधुनो
घृतस्येत्येतेन सौपर्णं सर्वा दिशोनुपर्यायादादित्यमीशानं सर्वावस्थ

Indira Gandhi National
Centre for the Arts

गृह्य
३५

यमग्रोधयेदुपश्चात्सयपथिवी मुलद्यानितितत्वेनेदुदुभिमभिमृशौं
दवस्यष्टापरापतेतीषुन्चिसर्जयेद्यत्रबाणाः संपतंती तेयुध्यमानेषुज
पे ॥ संश्रिष्याद्वा संश्रिष्याद्वा ॥ ॥ ७ ॥१२॥ ॥इत्याश्वलाय
नगृह्यसूत्रे तृतीयोध्यायः ॥ ॥ ॥ ७ ॥श्री ॥हरिः ॐ ॥ ॥
आहिताग्निं चेदुपतयेत्प्राच्यामुदीच्यामपराजितायांवादिश्युदवस्यग्रा
मकामा अग्नय इत्युदाहरंत्याशंसंत एनं ग्राममाजिगमिषतोगदं
कुर्युरिति हविज्ञायते गदः सोमेन पशुनेष्ट्वेष्ट्वा दवस्येदनिष्ट्वा वा पं

रोगः
३५

क्षि।

श्चितेभूमिभागं खानयेद्दक्षिणपूर्वस्यां दिशिदक्षिणापरस्यां वादक्षि
णाप्रवणं प्राग्दक्षिणाप्रवणं वा प्रत्यग्दक्षिणाप्रवणमित्येकेयावा
नुर्ध्वबाहुकः पुरुषस्तावदायामं व्याममात्रंतिर्यग्वितस्त्यवागपि तः
आकाशेरमशानं बहुलौषधिकं कंटकिक्षीरिणस्त्विति यथोक्तं
पुरस्ताद्यत्र सर्वत आपः प्रस्यंदेरन्नेतदादहनस्य लक्षणं श्मशान
स्य केशश्मश्रुलोमनखानीत्युक्तं पुरस्तात् --- बर्हिरा
ज्यं च दधन्यत्र सर्पिरानयंत्येतत्पित्र्यं पृषदाज्यं ॥ ॥१॥ ॥

गृह्य
३६

॥अथैतां दिशमग्नीन्नयंति यज्ञपात्राणि वान्वंचं चेतमयुजो मिथुनाः स्त्र

प्रवयसः पीठचक्रेण गोयुक्तेनेत्येकेनुस्तरणीं गामजां वैकवर्णांकृ

ष्णामेके सव्ये बाहूबध्वानुसंकालयंत्यन्वंचो मात्या अधोनिवीताः

प्रवृत्तशिखा ज्येष्ठप्रथमाः कनिष्ठजघन्याः प्राप्यैवं भूमिभागं गर्ते

दकेनशमीशाखयात्रिःप्रसव्यमायतनं परिव्रजन्प्रोक्षन्नपेत

वीतविचसर्पतातइति दक्षिणपूर्व उद्धृतांतआहवनीयं निदध्या

दुत्तरपश्चिमे गार्हपत्यं दक्षिणपश्चिमे दक्षिणाग्निमथैनं ३६ राम:

मंतवेदीध्म चित्तिं चिनोति यो जानाति तस्मिन्बर्हिरास्तीर्य कृष्णाजिनं चो

त्तरलोम तस्मिन्प्रेतं संवेशयंत्युत्तरेण गार्हपत्यं हृत्वाहवनीयमभिमुख

शिरसमुत्तरतः पत्नीं धनुश्च क्षत्रियाय तामुत्थापयेद्देवरः पतिस्था

नीयोंतेवासी वा जरद्दासो वोदीर्घ्वनार्यभिजीवलोकमिति कर्त्ता वृषले

जपेद्धनुर्हस्तादाददानो मृतस्येति धनुरुक्तं वृषलो पि ज्यं कृत्वा संचि

तिमचितासंचीर्यानुप्रहरेत् ॥२॥ ॥अथैतानि पात्राणि योज

येद्दक्षिणे हस्ते जुहूं सव्ये उपभृतं दक्षिणे पार्श्वे स्फ्यं च सव्ये ग्निहोत्रह

गृह्य
३०

वमीमुरसिध्कवांशिरसिकपालानिदत्सुग्राव्णोनासिकयोस्त्रु
वौभित्वाचैकंकर्णयोःप्राशित्रहरणेभित्वाचैकमुदरेपात्रीसमव
त्तधानंचचमसमुपस्थेशम्यामरणीदूरौरूलूखलेमुसलेजंघ
योःपादयोःशूर्पेछित्वाचैकमासेचनवंतिपृषदाज्यस्यपुत्रयंच
मापुत्रोदृषदुपलेकुंवरेलोहायसंचकौलालमनुस्तरण्याब
पामुखिघशिरोमुखंप्रछादयेदग्नेर्वर्मपरिगोभिर्व्ययस्वेतिवृक्कारामः
उद्धृत्यपाण्योराद्ध्यादतिद्रवसारमेयोश्वानाविलिदक्षिणेदक्षि ३०

ॐ इत्याश्वल
गृह्यसूत्रे

णंसव्येसव्यंहृदयेहृदयं--- कायेकायं --- पिंडौचेकेवृक्कापचारइ
त्येकेसर्वांयथांगंविनिक्षिप्यचर्मणाप्रछाद्येममग्नेचमसमाविजिह्
रस्तुतिप्रणीतापणयनमनुमंत्रयतेसव्यंजान्वाच्यदक्षिणान्प्राग्वा
ज्याकुतीर्जुहुयादग्नयेस्वाहासोमायस्वाहालोकायस्वाहानुमत
येस्वाहेतिपंचमीमुरसित्रस्यास्माद्वैत्वमजायथाअयंत्वदधिजा
यतामसौस्वर्गायलोकायस्वाहेति॥ २॥ प्रेष्यातियुगपदग्नीन्प्र
ज्वालयेयतेत्याहवनीयप्राप्नुयात्स्वर्गलोकएनं

Indira Gandhi National
Centre for the Arts

गृह्य २८ आपदेतिविद्यादसावमुत्रैवमयमस्मिन्नितिपुत्रोगार्हपत्यश्चै
तवैप्राप्नुयादेतस्मिंल्लोकएनंआपदितिविद्यादसावमुत्रै
वमयमस्मिन्नितिपुत्रोदक्षिणाग्निश्चैतवैप्राप्नुयान्मनुष्यलोकए
नंआपदितिविद्यादन्नमेवरात्स्यत्यसावमुत्रैवमयमस्मिन्नितिपु
त्रोयुवायस्यौपरामृश्येममदंतितंदघमानमनुमंत्रयतेइहि श्रौतम:
दिपथिभिःपूर्व्येभिरितिसमानंपचानांततीयमुद्दरेमेन
मग्नेविदहोमाभिशोचइतिषट्पृषाचेतश्च्यावयतुअविद्वानि २८

तिचतस्यउपसर्पमालरंभनिमेतामितिचतस्यःसोमएकेभ्यःपव
तऽइतिपंचऽउरूणसावसुतृपोउदुंबलौवितिचतुर्थ्रीरातिःसएवंविदा ह
वघमानःसहैवधर्मेनस्वर्गंलोकमेतीतिविज्ञायतेउत्तरपुरस्तादा
हवनीयस्यजानुमात्रंगर्तंखात्वाअद्भिःपरयित्वावकाशापालमि
त्यवधापयेत्ततोहवाएवनिघ्नन्त्यसहैवधर्मेनस्वर्गंलोकमेती
तिविज्ञायतेइमेजीवामृतैरावर्त्रन्नितिसव्यावृताव्रजंत्यन
वेक्षमाणायत्रोदकमवहद्भवतितत्स्नात्यसकृदुन्मज्ज्यैकांजलि

गृ·सू· ३९ मुत्सृज्य तस्य गोत्रं नाम गृहीत्वोत्तीर्यान्यानि वासांसि परिधाय स
कृदन्यान्यापीड्योदग्दशानि विसृज्यासत आ नक्षत्रदर्शनादादित्य
स्य वा दृश्यमाने प्रविशेयुः कनिष्ठप्रथमा ज्येष्ठजघन्याः प्राप्या
गारमश्मानमग्निं गोमयमक्षतांस्तैलमुपस्पृशंति नैतस्यां रात्र्या
मन्नं पचेरन्क्रीतोत्पन्नेन वा वर्त्तेरं स्त्रिरात्रमक्षारालवणाशिनः स्यु
र्द्वादशरात्रं वा महागुरुषु दानाध्ययने वर्जयेरन्दशाहं श्रीरामः
सपिंडेषु गुरौ चासपिंडे प्रत्तासु च स्त्रीषु त्रिरात्रमितरेष्वाचा ३९

र्येषु स्ता तौ चासपिंडे प्रत्तासु च स्त्रीषदंतजाते परिजाते चैकाहं स
ब्रह्मचारिणी समानग्रामीये च श्रोत्रिये ॥४॥ संचयनमूर्ध्वं दशम्याः
कृष्णपक्षस्यायुजेस्वेकनक्षत्रेण लक्षणे कुंभे पुमांसमलक्षणायां
स्त्रियमयुजो मिथुनाः प्रवयसः क्षीरोदकेन शमीशाखया त्रिः प्रस
व्यमायतनं परिव्रजन्प्रोक्षति शीतिके शीतिकावतीत्यंगुष्ठोपकनि
ष्ठिकाभ्यामेकैकमस्थि संह्रादयंतो वदध्युः पादौ पूर्वं शिर उत्तरं
सुसंचितं संचित्य पवनेन संपूय यत्र सर्वत आपो नाभिष्यंदेर

Indira Gandhi National
Centre for the Arts

आश्व गृ° सू°

नन्यतोवर्षाभ्यस्तत्रगर्तेवदध्युरुपसर्पमातरंभूमिमेतामित्यु
त्तरयापांसूनवकिरेदवकीर्योत्तरामुत्तेस्तभ्नामीतिकपा॰॰ले
नापिधायाथानवेक्षन्प्रत्याव्रज्यापउपस्पृश्यश्राद्धमस्मैद
द्युः॥५॥गुरुणाभिरस्ताअन्यतोवापक्षीयमाणाअमावास्या
यांशांतिकर्मकुर्वीरन्पुरोदयाग्निंसहभस्मानंसहायत
नंदक्षिणाहरेयुःक्रव्यादमग्निंप्रहिणोमिदूरमित्यर्द्धर्चेन श्रीरामः
तंचतुष्पथेन्युप्ययत्रवाभिःप्रसव्यंपरियंतिसव्यैःपाणि ४०

भिःसव्यानरूनाघ्नानाःऽअथानक्षंप्रत्याव्रज्यापउपस्पृश्यकेशश्मश्रुलो
मनखानिवापयित्वोपकल्पयीरंनवान्मणिकान्कुंभानाचमनी॰यांश्च
शमीसुमनोमालिनःशमीमयमिध्मंशमीमय्यावरणीपरिधींश्चान
डुहंगोमयंचर्मचनवनीतमश्मानंचयावत्योयुवतयस्तावंतिकु
शपिंजूलान्यग्निवेलायामग्निंजनयेदिहैवायमितरोजातवेदा
इत्यर्द्धर्चेनतंदीपयमानाऽआसतआशांतरात्रादायुष्मतांक
थाःकीर्तयंतोमांगल्यानीतिहासपुराणान्याख्यापयमानाउप

Indira Gandhi National
Centre for the Arts

ग.सू.
४१

रत्नेषुशाद्वेषुसंप्रविष्टेषुवागृहंनिवेशानंवादक्षिणाद्द्वारपक्षात्
क्रम्याविछिन्नामुदकधारांहरेत्तंतुंतन्वंनजसोभानुमन्विहीत्यो
त्तस्मादथाग्निमुपसमाधायपश्चादस्यानडुहंचर्मास्तीर्यप्राग्री
वमुत्तरलोमतस्मिन्नमास्यानारोहयेदारोहतायुर्जरसंवृणा
नाइतीमंजीवेभ्यःपरिधिंदधामीतिपरिधिंपरिदध्यादंतर्मृत्युं
दधतांपर्वतेनेत्युत्तरतोश्मानमग्नेःकृत्वापरंमृत्योअनुप श्रीरामः।
रेहिपंथामितिचतस्रभिःप्रत्यृचंकृत्वायथाहान्यनुपूर्वं ४१

सवतीत्यमास्यानीक्षेतयुवतयःपृथक्पाणिभ्यांदर्भतरुणकै
र्नवनीतेनांगुष्ठोपकनिष्ठिकाभ्यामक्षिणीआंज्यपराच्योवि चो
सृजेयुरिमानारीरविधवाःसुपत्नीरित्यंजानाईक्षेतारम
न्वतीरीयतेसंरभध्वमित्यश्मानंकर्त्तप्रथमोभिमृशोदथा
पराजितायांदिश्यवस्थायाग्निनानडुहेगोमयेनचावाछि
नयाचोदकधारयापोहिष्ठामयोभुवइतित्र्चेनपरीमे
गामनेषतेतिपरिक्रामत्सुजपेत्पिंगलानडुह्यापरिणय

Indira Gandhi National
Centre for the Arts

ग सू
४२

स्यादित्युदावदंत्ययोपविशंतियत्राभिरंस्यमानाभवंत्यहतेनवा
ससाप्रच्छाद्यासतेस्वपंत ओदयादुदितऽआदित्येसौर्याणिस्व
स्त्ययनानिचजपित्वान्नंसंस्कृत्यापनःशोशुचदघमितिप्रत्यृ
चंकुत्वाब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीतगौःकंसोह
तंवासश्चदक्षिणा॥९॥अथातःपार्वणश्राद्धकाम्यआभ्यु
दयिकएकोद्दिष्टंवाब्राह्मणान्श्रुतशीलवृत्तसंपन्नानेकेनवा श्रीरामः
कालेज्ञापितान्स्नातान्कृतपच्छौचानाचांतानुदङ्मुखान्पितृव ४२

दुपवेश्यैकैकमेकैकस्यद्वौद्वौत्रींस्त्रीन्वावृद्धौफलभूयस्त्वंनत्वेवै
कंसर्वेषांकाममनाद्येपिंडैर्व्याख्यातमपःप्रदायदर्भान्द्विगु
णभुग्नानासनंप्रदायापःप्रदायतैजसाश्ममृन्मये
षुत्रिषुपात्रेष्वेकद्रव्येषुवादर्भांतर्हितेष्वपःप्रदायआसि
च्यशंनोदेवीरभिष्टयऽइत्यनुमंत्रितासुतिलानावपतिति
लोसिसोमदेवत्योगोसवेदेवनिर्मितः॥प्रत्नवद्भिःप्रत्तः
स्वधयापितॄनिमांल्लोकान्प्रीणयाहिनःस्वधानमऽइतिप्रस

Indira Gandhi National Centre for the Arts

नर

ग.घ

४३

व्येनेतरपाण्यंगुष्ठांतरेणोपवीती त्वा दक्षिणेन वा सव्येनं पित पगृहीते१

रिदं तेऽअर्घ्यं पितामहेदं तेअर्घ्यं प्रपितामहेदं तेअर्घ्यमित्यप

वर्जेत् प्रतिग्राह यिष्यन्स्वकृतस्वकृत स्वधाअर्घ्याऽइति प्रसृष्टोऽ

अनुमंत्रयेत् या दिव्याआपः पृथिवि संबभूवुर्या अंतरि

क्ष्याउत पार्थिवी र्याः ॥ हिरण्यवर्णा यज्ञियास्तानआपः शं

स्योना भवंत्विति संस्रवान्त्सभवनीयां ताभिरद्भिः पुत्रका श्रीरामः

मो मुखमनक्ति ॥ नोद्धरेत्प्रथमंपात्रं पितृणामर्घ्यपातितं ॥ ४३

---

आवृतास्तत्र तिष्ठंति पितरः शौनकोब्रवीत् ॥ उद्धरेद्यदि चेत्पात्रं वि

वृतं वा यदा भवेत् ॥ तदासुरं भवेच्छ्राद्धं क्रुद्धैः पितृगणैर्नरा ॥७॥ [illegible]र

एतस्मिन्काले गंधमाल्यधूपदीपाच्छादनानां प्रदानमुद्धृत्य घृता

क्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा प्रसम्य

नुज्ञाः क्रियतां कुरुष्व कुर्वित्यथाग्नौ जुहोति यथोक्तं पुरस्तादभ्य ५

नुज्ञायां पाणिष्वेव वाग्निमुखा वै देवाः पाणिमुखाः पितर इ

ति हि ब्राह्मणं यदि पाणिष्वाचांतेष्वन्यदन्नमनुदिशंत्यपिन मंनेस्त

ग॰ध्य॰
४४

त्वं द्वत्तमग्ध्नुकमितित्ततानज्ञायामधुमतीश्रावयेदक्षंनमीम
दंतेतिचसर्पंनामितिपृष्ट्वायद्यन्नमुपयुक्तंतत्तस्थालीपाकेन
सहपिंडार्थमुद्धृत्यशेषंनिवेदयेदभिमतेनुमतेवाभुक्तवत्स्व
नाचांतेषुपिंडानिदध्यादाचांतेषकेत्रकीर्यानमुवीयोस्व
धोच्यतामितिविसृजेदस्तुस्वधेतिवा॥८॥अथस्थलग
वः स्नात्रादिवसंतेवाईयाश्रेष्ठंस्वस्ययस्थस्यकुष्ठिपृषकेत्मा श्रीरामः
षामिस्येकेकामंळळमालोहवाश्वेत्सिद्धीदियवमतीनर ४४

द्रिरभिषिच्यस्त्रिरस्तआभसतोरुद्रायमहादेवायजुष्टोवर्द्ध
स्वेतितंवर्द्धसंपन्नदंतमं षभंयज्ञियापादिस्यसंदर्शग्रामाद्दध्य
मर्धरात्रादुदितइत्येकेवैर्धचरित्रवतंब्रह्माणमुपवेश्यसपला
शामाश्वशाखांसपनिखायब्रतत्यौकुशारज्जुरशानेअन्यतरया
पपंपरिवीयान्यतरयाद्धविरभिपशुंवद्धपेरशानायांवानि
युनक्तियस्मैनमस्तस्मैत्वाजुष्टंनियुनज्मीतिप्रोक्षणादिसमा
नंपशुनाविशेषान्वक्ष्यामेपात्र्यापलाशेनवावपांजुहुयादि

गृ॰सू॰

॥४५

त्तिहविज्ञायमनेहत्सैयम्रउआयशर्वायशिवायभवायमहादेवायो
ग्रायभीमायपशुपतयेरुद्रायशंकरायेशानायस्वाहेतिषड्भिर्वो
त्तरेरुद्रायस्वाहेतिवाचतस्रषुचतस्रषुकुशानासुचेलसृषुदि
क्षुबलिंहरेद्यास्तिरुद्रसर्वस्यांदिशिसेनास्ताभ्यएतंनमस्तेअ
स्तुमामाहिंसीरित्येवंप्रतिदिशंवादेशानंचतुर्भिःसूक्तैःचतस्रो
दिशउपतिष्ठेतकद्रुद्रायेमारुद्रायातेपितरिमारुद्रायास्थि श्रीराम
रधन्वनइतिसर्वरुद्रयज्ञेदिशामुपस्थानंतुषन्फलीकरणां ४५

---

आश्व॰ श्रावन मह

श्रवणंचमेश्रीसुरःपादानित्यग्नावनुप्रहरेद्वोगंचमेणाकुवरेलेति
शंवत्सउत्तरतोग्नेर्दर्भवीताकुशस्तनासुवासोणितंनिनयेच्छासिनी
घोषिणीविचिन्वतीःसमश्नुतीःसर्पाएतद्वोनेनगःप्रीणात्यथोदंडा
हस्यश्वासिनीघोषिणीविचिन्वतीःसमश्नुतीःसर्पाएतद्वाचतद्धर
ध्वमितिसर्पेभ्योयत्तत्रास्तगवध्यंवावस्तुतंभवतितद्धरंतिस
र्पाःसर्वाणिहनाअस्यनामधेयानिसर्वाःसेनाःसर्वाण्युध्रयमा
[illegible]नीत्येवंविद्यजमानंप्रीणातिनास्यब्रुवाणांचनहिनस्तीति

३३२॥७१

गृह्य ॥४६ विज्ञायते नास्य प्राश्नीयान्नास्य मामम माहरे सुरभिमानुं को हि
षोहै षदेवः प्रजामवतीस्य मात्यानं तत्रः प्रतिबधयेध येन्निये
गात्तु प्राश्नीयुः स्वस्त्ययन इति स एष श्रलगवोधन्यो लोक्यः पु
ण्यः पुत्र्यः पशव्य आयुष्यो यशस्य इक्षान्य मुस्त जेन्नानुस्टष्टस्या
न्नहापशुर्भवतीति विज्ञायते शंतातीयेन जपन्नरहानिया
त्पशूनामुपतापएतमेवदेव मध्ये गोष्ठस्य यजेतस्थालीपाकं
सर्वहुतं बर्हिराज्यं चानुप्रहत्य घृतमतो गा आनयेच्छंतातीयं ॥म ४६

जपन्पशूनां मध्यमियान्मध्यमियान्नमः शौनकाय नमः
शौनकाय॥ ॥छ॥ ॥छ॥ ॥इत्याश्वलायनगृह्यसू
त्रे चतुर्थोध्यायः॥ ॥छ॥ ॥संवत १८ ४३ [redacted] ॥माघमा
से कृष्णपक्षे द्वादश्यां मिं वासरे॥ लिखितं धुंडिराजेन ग
हरे त्युपनामकः॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते॥ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथि
लबंधनात्॥ मूर्खहस्ते न दातव्यं एवं वदति पुस्तकं॥ श्रीरामार्पणमस्तु॥ ॥छ॥

Indira Gandhi National Centre for the Arts

ग्र॰ ५॰
४८

॥श्री॥

॥श्री॥ इत्याश्वलायनगृह्यसूत्रं समाप्तः॥
॥श्री॥ इदं पुस्तकं गद्रोपनामक धुंडिरा॥
॥जेनालिखितं॥ पुस्तकमिदं धुंडिराजस्य॥

श्रीचंद्रलोप
रत्नोऽश्वलेन
मः॥ ॥

श्रीउद्दाम
नृसिंहाय
नमः॥ ॥

राम
४७

Indira Gandhi National
Centre for the Arts